इति राजनिर्घण्टः ॥ (पङ्क्त्यन्तर्गतः दशाक्षरः छन्दोविशेषः । तल्लक्षणं यथा, छन्दोमञ्जर्याम् ।
"ज्ञेया मत्ता मभसगयुक्ता ।"
अधिकन्तु छन्दःशब्दे द्रष्टव्यम् ॥)

मत्तालम्बः, पुं, (आलम्बते असावित्यालम्बः । आ+लम्ब+कर्म्मणि घञ् । मत्तस्यालम्बः आश्रयः ।) प्राङ्गनावरणम् । तत्पर्य्यायः । अपाश्रयः २ प्रग्रीवः ३ मत्तवारणम् ४ । इति हेमचन्द्रः । ४ । ७८ ॥

मत्तेभगमना, स्त्री, (मत्तेभस्य गमनमिव गमनं यस्याः ।) स्त्रीविशेषः । मत्तगजगामिनी । इति हेमचन्द्रः । ३ । १७० ॥

मत्यं, क्ली, (मतं ज्ञानं तस्य करणमिति । मत+ "मतजनहलात् करणजल्पकर्षेषु ।" ४ । ४ । ९७ । इति यत् । हृदस्य चेतस्य समीकरणादिसाधनफलकम् । यथा, ताण्ड्यमहाब्राह्मणे । २ । ९ । २ ।
"भ्रातृव्यवांस्तवीत यथा सम्राक्षितेन मत्येन । मतीकरोत्येवं पाप्मानं भ्रातृव्यं प्रवृजति ॥"
"मत्यं नाम हृदस्य चेतस्य समीकरणादिसाधनफलकम् ।" इति तद्भाष्ये सायनः ॥)
दात्रादीनां मुष्टिः । तत्पर्य्यायः । वराटः २ । इति हेमचन्द्रः । ३ । ५५६ ॥

मत्र, इ ङ कगुप्तोक्तौ । इति कविकल्पद्रुमः ॥ (चुरा०-आत्म०-सक०-सेट् ।) दन्त्यवर्गाद्योपधः । इ ङ इति धुनं मन्त्र्यते वृषोऽयमिति सरारिः ॥ मन्त्र इत्यनेनैवेष्टसिद्धौ इदनुबन्धो वेदेषु वारणमेदार्थः । इति दुर्गादासः ॥

मत्सः, पुं, (माद्यतीति । मद्+बाहुलकात् सन् ।) मत्स्यः । इत्युणादिकोषः ॥

मत्सगण्डः, पुं, (मत्स्यानां गण्डोऽत्र पृषोदरादित्वात् साधुः ।) व्यञ्जनविशेषः । मत्स्यघण्ट इति ख्यातः । तत्पर्य्यायः । गलग्रहः २ । इति शब्दचन्द्रिका ॥

मत्सरः, पुं, (मदते इति मद्+"कृधूमदिभ्यः कित् ।" उणा० । ३ । ७३ । इति सरन् । स च कित् । यद्वा । मदा सरतीति अमरटीका ।) अन्यशुभद्वेषः । इत्यमरः । ३ । ३ । १७२ ॥ (यथा, कथासरित्सागरे । ४२ । ६५ ।
"शीर्षान्ताङ्गच्छयामास द्वितीयमपि तत्फलम् । निसर्गसिद्धो नारीणां सपत्नीषु हि मत्सरः ॥")
क्रोधः । इति मेदिनी । रे, १६३ ॥

मत्सरः, त्रि, (माद्यतीति । मद् हर्षे+"कृधूमदिभ्यः कित् ।" उणा० । ३ । ७३ । इति सरन् । स च कित् ।) असह्यपरसम्पत्तिः । मात्सर्य्ययुक्तः । (यथा, महानिर्व्वाणतन्त्रे । १ । २६ ।
"न मत्सरा नातिरुष्टा नातिलुब्धा न कामुकाः ।")
कृपणः । इत्यमरमेदिनीकरौ ॥ आत्मधिक्कारविशेषः । यथा, —
"निन्दन्ति मां सदा लोका धिगस्तु मम जीवनम् ।
इत्यात्मनि भवेद्यस्तु धिक्कारः स च मत्सरः ॥"
इति पाद्मे क्रियायोगसारे १६ अध्यायः ॥

मत्सरा, स्त्री, (मद्+सरन् । स्त्रियां टाप् ।) मक्षिका । इति मेदिनी । रे, १६३ ।

मत्सरी, [न्] त्रि (मत्सरोऽन्यशुभद्वेषोऽस्त्यस्येति मत्सर+इनिः ।) अन्यशुभद्वेष्टा । तत्पर्य्यायः । कर्णेजपः २ दुर्ज्जनः ३ पिशुनः ४ सूचकः ५ नीचः ६ द्विजिह्वः ७ खलः ८ । इति हेमचन्द्रः ॥ (यथा, मनौ । २ । २०१ ।
"परिभोक्ता कृमिर्भवति कीटो भवति मत्सरी ॥")

मत्स्यः, पुं स्त्री, (माद्यन्ति लोका अनेनेति । मद्+"ऋतन्यञ्जीति ।" उणा० । ४ । २ इति स्यन् ।) स्वनामख्यातजलजन्तुः । माछ इति भाषा ॥ तत्पर्य्यायः । पृथुरोमा २ झषः ३ मीनः ४ वैसारिणः ५ अण्डजः ६ विसारः ७ शकली ८ । इत्यमरः । १ । १० । १७ ॥ शम्बली ९ झषः १० आत्माशी ११ संवरः १२ मकः १३ जलेशयः १४ कण्टकी १५ शल्की १६ मच्छः १७ अनिमिषः १८ । इति शब्दरत्नावली ॥ शुल्की १९ । इति जटाधरः ॥ तस्य गुणाः । वृंहणत्वम् । गुरुत्वम् । शुक्रबर्द्धनत्वम् । बल्यत्वम् । स्निग्धत्वम् । उष्णत्वम् । मधुरत्वम् । कफपित्तकरत्वम् । व्यायामाध्वरतदीप्ताग्नीनां पूजितत्वम् । वातरोगहरत्वञ्च ॥ * ॥ हृदमत्स्यगुणाः । गुरुत्वम् । शुक्रलत्वम् । मलबद्धकारित्वञ्च ॥ * ॥ क्षुद्रमत्स्यगुणाः । लघुत्वम् । ग्राहित्वम् । ग्रहणीरोगे हितत्वञ्च ॥ * ॥ कृष्णमत्स्यगुणाः । लघुत्वम् । स्निग्धत्वम् । वातघ्नत्वम् । वह्निवर्द्धनत्वञ्च ॥ * ॥ पाण्डरमत्स्यगुणाः । दोषलत्वम् । स्निग्धत्वम् । गुरुत्वम् । मलभेदित्वञ्च ॥ * ॥ क्वथितमत्स्यस्य अर्थात् पूतिमत्स्यस्य गुणः । दोषलत्वम् ॥ * ॥ शुष्कमत्स्यगुणौ । विष्टम्भित्वम् । दुर्ज्जरत्वञ्च ॥ * ॥ लवणभावितमत्स्यगुणाः । कफपित्तकरत्वम् । सारकत्वम् ॥ सामुद्रमत्स्यगुणाः । लघुत्वम् । वृष्यत्वम् । मधुरत्वम् । स्वल्पमलकारित्वञ्च ।
"सामुद्रा गुरवो वृष्याः स्निग्धोष्णा वातनाशनाः ।"
इति पाठान्तरम् ॥ * ॥
(तथास्य पर्य्याया गुणाश्च ।
"मत्स्यो मीनो विकारश्च उषो वैसारिणोऽण्डजः ।
शकुलः पृथुरोमा च स सुदर्शन इत्यपि ॥
रोहितादास्तु ये जीवास्ते मत्स्याः परिकीर्त्तिताः ।
मत्स्याः स्निग्धोष्णमधुरा गुरवः कफपित्तलाः ॥
वातघ्ना वृंहणा वृष्या रोचका बलवर्द्धनाः ।
मद्यव्यवायसक्तानां दीप्ताग्नीनाञ्च पूजिताः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे ॥
"मत्स्या रोहितपाठीनकूर्म्मकुम्भीरकर्कटाः ।
शुक्तिशङ्खोद्रशम्बूकशफरीवर्म्मिचन्द्रिकाः ॥
चुलूकीनक्रमकरशिशुमारतिमिङ्गिलाः ।
राजीवाः चिलिचिमाद्याश्च ॥"
इति वाभटे सूत्रस्थाने षष्ठेऽध्याये ॥
मत्स्यास्तु द्विविधा नादेयाः सामुद्राश्च । तत्र नादेयाः । रोहित-पाठीन-पाटला-राजीव-वर्म्मिगोमत्स्य-कृष्णमत्स्य-वागुञ्जार-मुरल-सहस्रदंष्ट्रप्रभृतयो नादेयाः ॥
"नादेया मधुरा मत्स्या गुरवो मारुतापहाः ।
रक्तपित्तकराश्चोष्णा वृष्याः स्निग्धाल्पवर्चसः ॥
कषायानुरसस्तेषां शष्पशैवालभोजनाः ।
सरस्तडागसम्भूताः स्निग्धाः स्वादुरसाः स्मृताः ।
महाह्रदेषु बलिनः स्वल्पेऽम्भस्यबलाः स्मृताः ।"
तिमितिमिङ्गिलकुलिशपाकमत्स्यनिरालकनन्दिवारलकमकरगर्गरकचन्द्रकमहामीनराजीवप्रभृतयः सामुद्राः ॥
"सामुद्रा गुरवः स्निग्धा मधुरा नातिपित्तलाः ।
उष्णावातहरा वृष्या वर्च्चस्याः श्लेष्मवर्द्धनाः ॥
बलावहा विशेषेण मांसाशित्वात् समुद्रजाः ।
तेषामप्यनिलघ्नत्वाच्चौण्ट्यकौप्यौ गुणोत्तरौ ॥
स्निग्धत्वात् स्वादुपाकत्वात् तयोर्वाप्या गुणोत्तराः ।
नादेया गुरवो मध्ये यस्मात् पुच्छास्यचारिणः ।
सरस्तडागजानान्तु विशेषेण शिरो लघु ॥
अदूरगोचरा यस्मात्तस्मादुत्सोदपानजाः ।
किञ्चिन्मुक्ता शिरोदेशमधस्तात् गुरवस्तु ते ॥
अधस्तद्गुरवो ज्ञेया मत्स्याः सरसिजाः स्मृताः ।
उरो विचरणात्तेषां पूर्व्वमङ्गं लघु स्मृतम् ॥"
इति सुश्रुते सूत्रस्थाने ४६ अध्यायः ॥)
नादेयमत्स्यगुणाः । श्लेष्मलत्वम् । वृष्यत्वम् । मधुरत्वम् । अल्पमलभेदकत्वञ्च ॥ * ॥ सरस्तड़ागभवमत्स्यगुणौ । स्निग्धत्वम् । स्वादुरसत्वम् ॥ * ॥ महाह्रदभवमत्स्याः बलिनः । अल्पजलभवाः अबलाः ॥ * ॥ दग्धमत्स्यगुणाः । गुरुत्वम् । वृष्यत्वम् । वृंहणत्वम् । बलवर्द्धनत्वञ्च ॥ तैललवणयुक्तदग्धमत्स्यगुणाः । क्षीणशुक्रभग्नजर्ज्जरितनित्यस्त्रीसेवित्क्षीणतेजसां हितकारित्वञ्च ॥ * ॥ पलाशवेष्टितकर्द्दमलेपिताङ्गारदग्धलवणवेशवारपुरस्कृतसार्द्रककटुतैलसन्तोलितमत्स्यगुणाः । स्वादुत्वम् । कफवातहरत्वम्, शुक्रलत्वम् । बलवर्द्धनत्वञ्च ॥ * ॥ शाकमत्स्याख्यव्यञ्जनगुणाः । हृद्यत्वम् । वृष्यत्वम् । पुष्टिदत्वञ्च , मत्स्यघण्टगुणाः । बलकरत्वम् । वातहरत्वम् , अतिशयरोचनत्वञ्च ॥ शिरसि खड्गकेशधारिमत्स्यगुणाः । सुखप्रियत्वम् । हृद्यत्वम् । पुंस्त्वघातकत्वञ्च । इति राजवल्लभः ॥ * ॥ अपि च ,
"निःशल्का निन्दिता मत्स्याः सर्व्वे शल्कयुता हिताः ।
वपुःस्थैर्य्यकरा वीर्य्यबलपुष्टिविवर्द्धनाः ॥
ह्रदकुल्याजलनिर्झरतड़ागवापीजलेषु ये मत्स्याः ।
तेऽतिजड़ा नादेया यथोत्तरं लघुतरास्तु नादेयाः ॥
क्षारास्तुमत्स्या गुरवो विदाहिनो
विष्टम्भदास्ते लवणार्णवादिजाः ।
नानाश्रिताः स्वादुजलस्थिता अपि
ज्ञेया जड़ास्तेऽपि तथाश्रिता इमे ॥"
इति राजनिर्घण्टः ॥